# श्री सुरसरस्वती सभा शृङ्गेरि

## तृतीया परीक्षा

### प्रथम पत्रिका

Aug-2010 (1)

अङ्काः-१००

दिनाङ्कः - २९-८-२०१०
समयः-३-०० होराः

पूर्वाह्ने - १०-०० तः १-०० पर्यन्तम्

1x8=8

**1 एकवाक्येन संस्कृतभाषया उत्तरं लिखत । ( अष्टानामेव)**

१. बालिकायाः हस्ते किमासीत् ?
२. अचक्षुषां चक्षुः कः ?
३. रामशुकः कुत्र न्यवसत् ?
४. एकलव्यः कः ?
५. धर्मव्याधः कुत्र न्यवसत् ?
६. कीदृशः पुरुषः न किञ्चित्कर्तुमर्हति ?
७. कालटि ग्रामः कुत्रास्ति ?
८. वृक्षच्छायायां प्रसुप्तः ब्राह्मणः किं दृष्टवान् ?
९. आपत्काले केषां वचनं ग्राह्यम् ?
१०. पञ्चतन्त्रं केन ग्रथितम् ?

2x5=10

**2 द्वित्रैः वक्यैः संस्कृतभाषया उत्तरं लिखत । (पञ्चानामेव)**

१. वाग्देवता स्वहस्तेषु किं किं धारयति ?
२. नयशास्त्रकर्तारः के ?
३. चित्रग्रीवः कः ? स स्वाश्रितान् कथं ररक्ष ?
४. सीता कुत्र कथं अवर्तत ?
५. पितामहः अत्मानं कथं दर्शितवान् ?
६. नरः आत्मनः चरितं प्रत्यहं कथं प्रत्यवेक्षेत ?

3x3=9

**3 संस्कृतभाषया उत्तरं लिखत। (त्रयाणामेव)**

१. मल्लस्य सामर्थ्यं विशदयत ।



पश्चादनुवर्तते

२. शङ्कराचार्यैः कुत्र कुत्र मठाः स्थापिताः ? कुतः ?

३. सुमतेरभिप्रायं विवृणुत ।

४. गृहिणी द्विजं किमवदत् ?

**4** **त्रयाणामुत्तरं मातृभाषया आङ्लभाषया वा लिखत ।** 3x4=12

१ ''विक्रमस्यौदार्यम् '' कथमासीत् विवृणुत ।

२. ''ब्राह्मणः सर्पश्च'' अस्य पाठस्य कथा सारांशं लिखत ।

३. चित्रग्रीवकथासाराशं लिखत ।

४. एकलव्यस्य गुरुभक्तिं विशदयत ।

**5** **ससन्दर्भं विवृणुत । (चतुर्णामेव)** 4x3=12

१. तस्य चक्षुषी विदारयत । गलं भित्वा अश्नाम ।

२. प्रभूतधनेन योजयिष्यामि ।

३. मा विषादं कृथा देवि ।

४. मनुष्याणां शरीरस्थो रिपुः क्रोधः ।

५. सर्पेण युक्तमेव कृतम् ।

**6** **मातृभाषया अन्वयानुसारं उत्तरं लिखत । (द्वयोरेव)** 2x3=6

१. यदमोघमपामन्तरुप्तं बीजमज ! त्वया ।
अतश्चराचरं विश्वं प्रभवस्तस्य गीयसे ।।

२. स गत्वा वानरैः साकं राघवायात्मना कृतम् ।
निवेदयित्वा सकलं ददौ चूडामणिं च तम् ।।

३. रविनिशाकरयोर्ग्रहपीडनं गजभुजङ्गविहङ्गमबन्धनम् ।
मतिमतां च विलोक्य दरिद्रतां विधिरहो बलवानिति मे मतिः ।।

**7** **श्लोकं पूरयत । (द्वयोरेव)** 2x3=6

१. विद्यया + ................................. राक्षसाः ।।

२. वागीशाद्याः + ...................................... गजाननम् ।।

३. निन्दन्तु + ..................................... धीराः ।।

**8** **मातृभाषया अनुवादं कुरुत ।** 5

नर्मदातीरे गुहायां तपस्यन्तं मस्करीन्द्रं गोविन्दभगवत्पादं शरणमुपगम्य, तस्मात् संन्यासदीक्षामधिगम्य तस्यैव समीपे वेदान्तमध्यैत । अल्पीयसैव कालेन शिष्यस्य प्रतिभया विस्मितो गुरुः अमुं शिष्यं भगवतः शङ्करस्यावतारं मत्वा पाखण्डैरभिभूयमानस्य सनातनधर्मस्य परिपालनायादिशत् ।

**9** **रिक्तस्थानानि पूरयत ।** 4x1=4

१. अस्ति गोदावरीतीरे विशालः .................. तरुः ।

२. ब्रह्मस्तवः ..................... महाकाव्यात् उद्धृतः ।

३. वन्दे विष्णुं .................. सर्वलोकैकनाथम् ।

४. दृश् धातोः लोट् मध्यमपुरुषैकवचने ................ इति रूपम् ।

**10** **त्रयाणां पर्यायपदानि लिखत ।** 3x1=3

१. भुजगः  २. अन्तिकम्  ३. प्रतिकृतिः  ४. वायसः

**11** **त्रयाणां विरुद्धार्थकपदानि लिखत ।** 3x1=3

१. बन्धनम्  २. सृष्टिः  ३. शुभम्  ४. क्षीयते

**12** **वाक्यदोषं परिहरत ।** 3x1=3

१. द्रोणस्य सह अर्जुनः अगच्छत् ।

२. अथ द्वितीया दिने तस्य पिता समायाता ।

३. अहं भद्रमिदं न पश्यति ।

**13** **त्रयाणां वाक्यानि रचयत ।** 3x1=3

१. उपसृत्य  २. अमन्यत  ३. सदा  ४. उवाच



पश्चादनुवर्तते

**14** क्रियापदमेकं सर्वपुरुषवचनेषु लिखत । 3×1=3

१. स्यात्  २. अयाचत  ३. पश्यतु

**15** त्रयाणां सन्धिं विभज्य नाम लिखत । 1×3=3

१. तद्यथा  २. चिन्मयः  ३. भानुरसौ  ४. एकदैव

**16** प्रयोगं परिवर्तयत । (द्वयोरेव) 3

१. नाहं विद्याविक्रयं करोमि ।

२. मया स शुश्रूषितः ।

३. कोऽपि उपायः अनुष्ठीयताम्

**17** सुबन्तं तिडन्तं अव्ययं च पृथक् कुरुत । 3

१. साक्षात्, राजा, कदाचन, प्रोवाच, तन्द्रा, अवदत्

**18** अर्थविवरणेन सह लोकोक्तिमेकां पूरयत । 2×1=2

१. चक्रार + .................. पङ्क्तिः ।

२. यादृशं + ................... तादृशी ।

**19** व्याकरण विशेषं लिखत । (एकस्य) 2×1=2

१. तुभ्यं नमः

२. वायसेन सह

* * * * *

# श्री सुरसरस्वती सभा शृङ्गेरि

## तृतीया परीक्षा

### द्वितीयपत्रिका

Aug -2010 (2)

दिनाङ्कः - २९-०८-२०१०
अपराह्ने - १-३० तः ३-०० पर्यन्तम्

अङ्काः–५०
समयः–सार्धैकहोरा

**1** **अ) दशाभिः वाक्यैः संस्कृतभाषया प्रबन्धमेकं लिखत :-** 1x5=5

१. गजः  २. उद्यानम्  ३. गणकयन्त्रम्

**आ) संस्कृतभाषया पत्रमेकं लिखत :-** 1x5=5

१. स्वप्रवासविषये मित्राय पत्रं लिखत ।
२. स्वाध्ययनविषये पितरं प्रति पत्रं लिखत ।

**2** **द्वयोः लक्षणं सोदाहरणं आङ्ग्लभाषया कर्णाटकभाषया वा लिखत।** 2x3=6

१. उपसर्गाः  २. क्तक्तवतुप्रत्ययौ  ३. विशेषणम्

**3** **त्रिषु पुरुषवचनेषु लिखत । (द्वावेव)** 2x3=6

१. गच्छतु  २. क्षिपेत्  ३. जायते

**4** **प्रयोगं परिवर्तयत । (द्वयोरेव)** 1x3=3

१. छात्रैः संस्कृतभाषा पठ्यते ।  २. गोविन्दः वस्त्रं धरति ।
३. रामेण कौसल्या अवन्द्यत ।

**5** **वाक्यदोषान् परिहरत ।** 6x1=6

१. रामलक्ष्मणौ वनं अगच्छत् ।  २. गीता रमा सह वसति ।
३. जनानां स्वस्ति ।  ४. कालिदासस्य कविता मधुरम् अस्ति ।
५. गोविन्दः गृहं वसति ।  ६. वृक्षेण पत्रं पतति ।

**6** **कर्तृ - कर्म - क्रियापदानि निर्दिशत ।** 3x1=3

१. शिशुः क्षीरमपिबत् ।  २. भीमः कोपेन दुर्योधनं निन्दति ।
३. तडागस्य जलं हरिणाः पास्यन्ति ।



पश्चादनुवर्तते

**7** **त्रयाणां अन्यलिङ्गरूपं लिकत ।** 3x1=3

१. वयस्यः  २. व्याघ्रः  ३. नदी  ४. त्रयः

**8** **वाक्यमेकं स्वोत्तरभाषया विवृणुत** 2x1=2

१. गतं न चिन्तयेत् प्राज्ञः ।
२. विनाशकाले विपरीतबुद्धिः ।

**9** **मातृभाषया अनुवादं कुरुत :-** 6x1=6

१. धीमन्तः परोपकाराय श्राम्यत ।
२. सूर्यस्य उदयात् पक्षिणः तुष्यन्ति ।
३. धनी दरिद्रेभ्यः धनं यच्छेत् ।
४. यूयं प्रातः सायं च पुष्पाणि आनयत ।
५. नीलः मेघः आकाशे चरति ।
६. इदानीं पत्रं विलिख्य गुरुभ्यः प्रेषय ।

**10** **संस्कृतभाषया अनुवादं कुरुत ।** 5x1=5

१. ಆಕಾಶದಲ್ಲಿ ನಕ್ಷತ್ರಗಳು ಪ್ರಕಾಶಿಸುತ್ತವೆ.
The stars shines in the sky.
२. ನಾನು ಬಾಳೆಹಣ್ಣನ್ನು ತಿನ್ನುತ್ತೇನೆ.
I eat Banana.
३. ನೀನು ತಾಯಿಯೊಡನೆ ಹೋಗುತ್ತೀಯೆ.
You go with mother.
४. ಬ್ರಹ್ಮನು ಹೇಗೆ ಪ್ರಪಂಚವನ್ನು ಸೃಷ್ಟಿಸಿದನು ?
How did Brahma create the universe.
५. ಎಲ್ಲರೂ ಕಷ್ಟಕಾಲದಲ್ಲಿ ಧೈರ್ಯದಿಂದ ಇರಬೇಕು.
All should be brave in times of difficulty.

* * * * *